यद्येवमिह कथं पञ्चकपाल्यां संस्कृतः पञ्चकपालः इति? नैवात्र तद्धित उत्पद्यते। वाक्यमेव [1]भवति। त्रैशब्द्यं हि[2] साध्यं, पञ्चसु कपालेषु संस्कृतः, पञ्चकपाल्यां संस्कृतः पञ्चकपालः इति[3]। तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहः। अपरस्मादुत्पत्तिर्भविष्यति। अथेह कस्मान् न भवति, पञ्चभ्यो गर्गेभ्य आगतं पञ्चगर्गरूप्यम्, पञ्चगर्गमयम् इति? वा [4]इत्यनुवर्तते। सा च व्यवस्थितविभाषा [5]विज्ञायते ॥

## गोत्रेऽलुगचि। (८९/१०८१)

प्राग्दीव्यतः इत्येव। 'यस्कादिभ्यो गोत्रे' (२.४.६३/११४६) [6]इत्यादिना येषां गोत्रप्रत्ययानां लुगुक्तः, तेषामजादौ प्राग्दीव्यतीये[7] विषयभूते प्रतिषिध्यते। गर्गाणां छात्राः गार्गीयाः। वात्सीयाः। [8]आत्रेयीयाः। खारपायणीयाः। गोत्रे इति किम्? [9]कौबलम्। बादरम्। अचि इति किम्? गर्गेभ्य आगतम् गर्गरूप्यम्। गर्गमयम्। प्राग्दीव्यतः इत्येव, गर्गेभ्यो हितम् गार्गीयम्। गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुक् (म.भा. २.२४१)। बिदानामपत्यं युवा, [10]युवानौ बैदः, बैदौ। बैदशब्दात् अतः इञि (४.१.९५/१०९५) कृते तस्य च इञः 'ण्यक्षत्रियार्षञितो यूनि लुगणिञोः' (२.४.५८/१२७६) इति लुकि [11]रूपम्। एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि (म.भा. २.२४१), बैदस्य बैदयोर्वा अपत्यं[12] बहवो माणवकाः बिदाः। नह्यत्राञ् बहुषूत्पन्नः ॥

## यूनि लुक्। (९०/१०८३)

प्राग् दीव्यतः [13]इति वर्तते, अचि च। प्राग्दीव्यतीये अजादौ प्रत्यये विवक्षिते बुद्धिस्थेऽनुत्पन्न एव युवप्रत्ययस्य लुग् भवति। तस्मिन् निवृत्ते सति यो यतः प्राप्नोति स ततो भवति। फाण्टाहृतस्यापत्यं फाण्टाहृतिः। तस्यापत्यं युवा, 'फाण्टाहृतिमिमताभ्यां णफिञौ' (४.१.१५०/११७४)[14], फाण्टाहृतः। तस्य छात्राः इति[15] विवक्षितेऽर्थे बुद्धिस्थे युवप्रत्ययस्य लुग्भवति। तस्मिन् निवृत्ते इञन्तं प्रकृतिरूपं सम्पन्नम्[16]। तस्मात् 'इञश्च' (४.२.११२/१३३३) इत्यण् [17]भवति, फाण्टाहृताः। भागवित्तस्यापत्यं भागवित्तिः। तस्यापत्यं युवा, 'वृद्धाट्ठक् सौवीरेषु बहुलम्' (४.१.१४८/११७२) इति ठक्, भागवित्तिकः। तस्य छात्राः, पूर्ववद् युवप्रत्यये निवृत्ते, [19]'इञश्च' (४.२.११२/१३३३) इत्यण्, भागवित्ताः। तिकस्यापत्यं, 'तिकादिभ्यः फिञ्' (४.१.१५४/११७८), तैकायनिः। तस्यापत्यं युवा, 'फेश्छ च' (४.१.१४९/११७३) इति छः, तैकायनीयः। तस्य छात्राः, युवप्रत्यये निवृत्ते 'वृद्धाच्छः' (४.२.११४/१३३७), तैकायनीयाः। कपिञ्जलादस्यापत्यं कापिञ्जलादिः। तस्यापत्यं युवा, 'कुर्वादिभ्यो ण्यः' (४.१.१५१/११७५), [20]कापिञ्जलाद्यः। तस्य छात्राः, ण्ये[21] निवृत्ते 'इञश्च' (४.२.११२/१३३३) इत्यण्, कापिञ्जलादाः। [22]ग्लुचुकस्यापत्यं, 'प्राचामवृद्धात् फिन् बहुलम्' (४.१.१६०/११८४) [23]इति ग्लुचुकायनिः। तस्यापत्यं युवा, 'प्राग्दीव्यतोऽण्' (४.१.८३/१०७३), ग्लौचुकायनः। तस्य छात्राः, युवप्रत्यये निवृत्ते स एवाण्, ग्लौचुकायनाः। अचि इत्येव, फाण्टाहृतरूप्यम्। फाण्टाहृतमयम्। प्राग्दीव्यतः (४.१.८३/१०७३) इत्येव, भागवित्तिकाय हितं भागवित्तिकीयम् ॥

---

1. तु इत्यधिकम् ह. 2. इह इत्यधिकम् ड, नः इत्यधिकम् ई.ब. 3. च इत्यधिकम् ई.ब. 4. इत्येवानुवर्तते ह. 5. भविष्यति फ, विज्ञास्यते ह. 6. इति प्रकरणेन इ.क.ड.ई.ग. 7. प्रत्यये इत्यधिकम् इ.क.फ.ई. 8. नास्ति ई.फ. 9. कुबलस्येदं कौबलम् ब.क.फ.ड.ई.ह, बकुलस्य इदं बाकुलम् इ. 10. युवानौ नास्ति ब. 11. कृते इत्यधिकम् फ.ड. 12. अपत्यानि इत्यधिकम् ड.ह. 13. इत्येव क.फ. 14. इति इत्यधिकम् ड. 15. छे विवक्षिते बुद्धिस्थे ह. 16. भवति इत्यधिकम् क.फ.ह. 17. भवति नास्ति ब.ह. 18. भगवित्तस्य इ.ब.क.ड.ह. 19. स एव क, अञ् ह, इञश्च इत्यण् नास्ति इ.ह. 20. कपिञ्जलाद्यः ब. 21. एव प्रत्यये इत्यधिकम् क. 22. ग्लुचुकायनस्य ह. 23. इति नास्ति फ, इति फिन् ह.